# shivAShTakam 1

# શ્રીશિવાષ્ટકં ૧

## Document Information

Text title : shivAShTakaM 1

File name : shiva8_1.itx

Category : aShTaka, shiva

Location : doc_shiva

Transliterated by : NA

Proofread by : NA

Latest update : January 23, 2010, November 2, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 29, 2024

*sanskritdocuments.org*

# શ્રીશિવાષ્ટકં ૧

॥ અથ શ્રી શિવાષ્ટકમ્ ॥

પ્રભું પ્રાણનાથં વિભું વિશ્વનાથં જગન્નાથનાથં સદાનન્દભાજમ્ ।
ભવદ્ભવ્યભૂતેશ્વરં ભૂતનાથં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૧॥

ગલે રુણ્ડમાલં તનૌ સર્પજાલં મહાકાલકાલં ગણેશાધિપાલમ્ ।
જટાજૂટગઙ્ગોત્તરઙ્ગૈર્વિશાલં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૨॥

મુદામાકરં મણ્ડનં મણ્ડયન્તં મહામણ્ડલં ભસ્મભૂષાધરં તમ્ ।
અનાદિહ્યપારં મહામોહહારં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૩॥

વટાધોનિવાસં મહાટ્ટાટ્ટહાસં મહાપાપનાશં સદાસુપ્રકાશમ્ ।
ગિરીશં ગણેશં મહેશં સુરેશં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૪॥

ગિરિન્દ્રાત્મજાસંગ્રહીતાર્ધદેહં ગિરૌ સંસ્થિતં સર્વદા સન્નગેહમ્ ।
પરબ્રહ્મબ્રહ્માદિભિર્વન્ધ્યમાનં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૫॥

કપાલં ત્રિશૂલં કરાભ્યાં દધાનં પદામ્ભોજનમ્રાય કામં દદાનમ્ ।
બલીવર્દયાનં સુરાણાં પ્રધાનં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૬॥

શરચ્ચન્દ્રગાત્રં ગુણાનન્દ પાત્રં ત્રિનેત્રં પવિત્રં ધનેશસ્ય મિત્રમ્ ।
અપર્ણાકલત્રં ચરિત્રં વિચિત્રં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૭॥

હરં સર્પહારં ચિતા ભૂવિહારં ભવં વેદસારં સદા નિર્વિકારમ્ ।
શ્મશાને વસન્તં મનોજં દહન્તં શિવં શઙ્કરં શમ્ભુમીશાનમીડે ॥ ૮॥

સ્તવં યઃ પ્રભાતે નરઃ શૂલપાણે પઠેત્ સર્વદા ભર્ગભાવાનુરક્તઃ ।
સ પુત્રં ધનં ધાન્યમિત્રં કલત્રં વિચિત્રં સમાસાદ્ય મોક્ષં પ્રયાતિ ॥ ૯॥

॥ ઇતિ શિવાષ્ટકં સમ્પૂર્ણમ્ ॥

ઓ

*shivAShTakam 1*

pdf was typeset on February 29, 2024

Please send corrections to *sanskrit@cheerful.com*